# कामसूत्रम्




Edited by | **asit k panja**
Amitabha Mapdar
Rakesh Narayanan V

# कामसूत्रम्

## (सप्तमाधिकरणम्)

Edited by

asit k panja

&

Amitabha Mapdar

Rakesh Narayanan V

www.ayurvedah.in

**aarsha**, jaipur

Plot no. 4, Khandelwal nagar Extn,
Near Premnagar pulia, Agra Road,
Jaipur- 302031, Rajasthan

**Publisher** : **aarsha**

**Edition** : **First; March 2015**

**ISBN** :

**Price** : **FREE**

Composing and editing: **bapan neogi**

Cover page: **Rajarshi**

For any information, feedback and requirement of this book, please mail to:

aarshaayurveda@gmail.com www.ayurvedah.in

Published by **bapan neogi** on behalf of **aarsha**,

**aarsha**, jaipur
Plot no. 4, Khandelwal nagar Extn,
Near Premnagar pulia, Agra Road,
Jaipur- 302031, Rajasthan

www.ayurvedah.in

# सप्तमाधिकरणम्

## प्रथमोऽध्यायः

व्याख्यातं च कामसूत्रम् । (1.1)

तत्रोक्तैस्तु विधिभिरभिप्रेतमर्थमनधिगच्छनौपनिषदिकमाचरेत्। (1.2)

रूपं गुणो वयस्त्याग इति सुभगंकरणम् । (1.3)

तगरकुष्ठतालीसपत्रकानुलेपनं सुभगंकरणम् । (1.4)

एतैरेव सुपिष्टैर्वर्तिमालिप्याक्षतैलेन नरकपाले साधितमञ्जनं च । (1.5)

पुनर्नवासहदेवीसारिवाकुरण्टोत्पलपत्रैश्च सिद्धं तैलमभ्यञ्जनम् । (1.6)

तद्युक्ता एव स्रजश्च । (1.7)

पद्मोत्पलनागकेसराणां शोषितानां चूर्णं मधुघृताभ्यामवलिह्य सुभगो भवति । (1.8)

तान्येव तगरतालीसतमालपत्रयुक्तान्यनुलेपनम् । (1.9)

मयूरस्याक्षितरक्षोर्वा सुवर्णेनालिप्य दक्षिणहस्तेन धारयेदिति सुभगंकरणम् । (1.10)

तथा बादरं मणिं शङ्खमणिं च तेषां चाथर्वणान्योगान्गमयेत्। (1.11)

विद्यातन्त्राच्च विद्यायोगात्प्राप्तयौवनां परिचारिकां स्वामी
संवत्सरमात्रमन्यतो धारयेत्। (1.12)

ततो धारितां बालां मत्वा लालसीभूतेषु गम्येषु योऽस्याः संहर्षेण बहु
दद्यात्तस्मै विसृजेदिति सौभाग्यवर्धनम् । (1.13)

गणिका प्राप्तयौवनां स्वां दुहितरं तस्या विज्ञानशीलरूपानुरूप्येण
तानभिनिमन्त्र्य सारेण योऽस्यै इदमिदं च दद्यात्स पाणिं गृह्णीयादिति
संसाध्य रक्षयेदिति । (1.14)

सा च मातुरविदिता नाम नागरिकपुत्रैर्धनिभिरत्यर्थं प्रीयेत ।
(1.15)

तेषां कलाग्रहणे गन्धर्वशालायां भिक्षुकीभवने तत्र तत्र च संदर्शनयोगाः ।
(1.16)

तेषां यथोक्तदायिनां माता पाणिं ग्राहयेत्। (1.17)

तत्तावदर्थमलभमाना तु स्वेनाप्येकदेशेन दुहित्रे एतद्दत्तमनेनेति
ख्यापयेत्।। (1.18)

प्रच्छन्नं वा तैः संयोज्य स्वयमजानती भूत्वा ततो विदितेष्वेवं धर्मस्थेषु
निवेदयेत्। (2.1)

www.ayurvedah.in

सख्यैव तु दास्या वा मोचितकन्याभावामुपगृहीतकामसूत्रामाभ्यासिकेषु योगेषु प्रतिष्ठितां प्रतिष्ठिते वयसि सौभाग्ये च दुहितरमवसृजन्ति गणिका इति प्राप्योपचाराः । (2.2)

पाणिग्रहश्च संवत्सरमव्यभिचार्यस्ततो यथा कामिनी स्यात्। (2.3)

ऊर्ध्वमपि संवत्सरात्परिणीतेन निमन्त्र्यमाणा लाभमप्युत्सृज्य तां रात्रिं तस्यागच्छेदिति वेश्यायाः पाणिग्रहणविधिः सौभाग्यवर्धनं च । (2.4)

एतेन रङ्गोपजीविनां कन्या व्याख्याताः । (2.5)

तस्मै तु तां दद्युर्य एषां तूर्यविशिष्टमुपकुर्यात्। (2.6)

इति सुभगंकरणम् ।। (2.7)

धत्तूरकमरिचपिप्पलीचूर्णैर्मधुमिश्रैर्लिप्तलिङ्गस्य प्रयोगो वशीकरणम् ।
(3.1)

वातोद्भ्रान्तपत्रं मृतकनिर्माल्यं मयूरास्थिचूर्णावचूर्णं वशीकरणम् । (3.2)

स्वयंमृताया मण्डलकारिकायाश्चूर्णं मधुसंयुक्तं सहामलकैः स्नानं वशीकरणम् । (3.3)

वज्रस्नुहीगण्डकानि खण्डशः कृतानि मनःशिलागन्धपाषाणचूर्णेनाभ्यज्य सप्तकृत्वः शोषितानि चूर्णयित्वा मधुना लिप्तलिङ्गस्य संप्रयोगो वशीकरणम् । (3.4)

www.ayurvedam.in

एतेनैव रात्रौ धूमं कृत्वा तद्धूमतिरस्कृतं सौवर्णं चन्द्रमसं दर्शयति । (3.5)

एतैरेव चूर्णितैर्वानरपुरीषमिश्रितैर्यां कन्यामवकिरेत्सान्यस्मै न दीयते । (3.6)

वचागण्डकानि सहकारतैललिप्तानि शिंशपावृक्षस्कन्धमुत्कीर्य निदध्यात्। (3.7)

षड्भिर्मासैरपनीतानि देवकान्तमनुलेपनं वशीकरणं चेत्याचक्षते । (3.8)

तथा खदिरसारजानि शकलानि तनूनि यं वृक्षमुत्कीर्य निदध्यात्तत्पुष्पगन्धानि भवन्ति । (3.9)

गन्धर्वकान्तमनुलेपनं वशीकरणं चेत्याचक्षते प्रियंगवस्तगरमिश्राः सहकारतैलदिग्धा नागकेसरवृक्षमुत्कीर्य षण्मासनिहिता नागकान्तमनुलेपनं वशीकरणमित्याचक्षते । (3.10)

उष्ट्रस्यास्थि भृङ्गराजरसेन भावितं दग्धमञ्जनमुष्ट्रास्थ्यञ्जनिकायां निहितमुष्ट्रास्थिशलाकयैव स्रोतोञ्जनसहितं पुण्यं चक्षुष्यं वशीकरणं चेत्याचक्षते । (3.11)

एतेन श्येनभासमयूरास्थिमयान्यञ्जनानि व्याख्यातानि ।। (3.12)

उच्चटाकन्दश्च यष्टीमधुकं च सशर्करेण पयसा पीत्वा वृषो भवति । (4.1)

मेषबस्तमुष्कसिद्धस्य पयसः सशर्करस्य पानं वृषत्वयोगः । (4.2)

तथा विदार्याः क्षीरिकायाः स्वयंगुप्तायाश्च क्षीरेण पानम् । (4.3)

तथा पियालबीजानां मोरटाक्षीरविदार्योश्च क्षीरेणैव । (4.4)

श्रृङ्गाटककसेरुमधूकानि क्षीरकाकोल्या सह पिष्टानि सशर्करेण पयसा घृतेन मन्दाग्निनोत्करिकां पक्त्वा यावदर्थं भक्षितवाननन्ताः स्त्रियो गच्छतीत्याचक्षते । (4.5)

माषकमलिनीं पयसा धौतामुष्णेन घृतेन मृदूकृत्योद्धृतां वृद्धवत्सायाः गोः पयः सिद्धं पायसं मधुसर्पिर्भ्यामशित्वानन्ताः स्त्रियो गच्छतीत्याचक्षते । (4.6)

विदारी स्वयंगुप्ता शर्करामधुसर्पिर्भ्यां गोधूमचूर्णेन पोलिकां कृत्वा यावदर्थं भक्षितवाननन्ताः स्त्रियो गच्छतीत्याचक्षते । (4.7)

चटकाण्डरसभावितैस्तण्डुलैः पायसं सिद्धं मधुसर्पिर्भ्यां प्लावितं यावदर्थमिति समानं पूर्वेण । (4.8)

चटकाण्डरसभावितानपगतत्वचस्तिलान्श्रृङ्गाटककसेरुकस्वयंगुप्ताफलानि गोधूममाषचूर्णैः सशर्करेण पयसा सर्पिषा च पक्वं पायसं यावदर्थं प्राशितमिति समानं पूर्वेण । (4.9)

सर्पिषो मधुनः शर्कराया मधुकस्य च द्वे द्वे पले मधुरसायाः कर्षः प्रस्थं पयस इति षडङ्गममृतं मेध्यं वृष्यमायुष्यं युक्तरसमित्याचक्षते । (4.10)

शतावरीश्वदंष्ट्रागुडकषाये पिप्पलीमधुकल्के गोक्षीरच्छागघृते पक्के तस्य पुष्यारम्भेणान्वहं प्राशनं मेध्यं वृष्यमायुष्यं युक्तरसमित्याचक्षते ।(4.11)

शतावर्याः श्वदंष्ट्रायाः श्रीपर्णीफलानां च क्षुण्णानां चतुर्गुणे जले पाक आ प्रकृत्यवस्थानात्। (4.12)

श्वदंष्ट्राचूर्णसमन्वितं तत्सममेव यवचूर्णं प्रातरुत्थाय द्विपलिकमनुदिनं प्राश्नीयान्मेध्यं वृष्यमायुष्यं युक्तरसमित्याचक्षते ।। (4.13)

आयुर्वेदाच्च वेदाच्च विद्यातन्त्रेभ्य एव च । (5.1)
आप्तेभ्यश्चावबोद्धव्या योगा ये प्रीतिकारकाः ।। (5.2)

न प्रयुञ्जीत संदिग्धान्न शरीरात्ययावहान्। (6.1)
न जीवघातसम्बद्धान्नाशुचिद्रव्यसंयुतान्।। (6.2)

तथा युक्तान्प्रयुञ्जीत शिष्टैरपि न निन्दितान्। (7.1)
ब्राह्मणैश्च सुहृद्भिश्च मङ्गलैरभिनन्दितान्।। (7.2)

www.ayurvedah.in

## सप्तमाधिकरणम्

## द्वितीयोऽध्यायः

चण्डवेगां रञ्जयितुमशक्नुवन्योगानाचरेत्।। (1.0)

रतस्योपक्रमे संबाधस्य करेणोपमर्दनं तस्या रसप्राप्तिकाले च
रतयोजनमिति रागप्रत्यानयनम् ।। (2.0)

औपरिष्टकं मन्दवेगस्य गतवयसो व्यायतस्य श्रान्तस्य च रागप्रत्यानयनम् ।।
(3.0)

अपद्रव्याणि वा योजयेत्।। (4.0)

तानि सुवर्णरजतताम्रकालायसगजदन्तगवलद्रव्यमयाणि त्रापुषाणि
सैसकानि च मृदूनि शीतवीर्याणि वृष्याणि कर्मसहिष्णूनि भवन्तीति
बाभ्रवीया योगाः ।। (5.0)

दारुमयानि साम्यतश्चेति वात्स्यायनः ।। (6.0)

www.ayurvedan.in

लिङ्गप्रमाणान्तरं बिन्दुभिः कर्कशपर्यन्तं बहुलैः स्यात्।। (7.0)

एत एव द्वे संघाटी ।। (8.0)

त्रिप्रभृति यावत्प्रमाणं वा चूडकः ।। (9.0)

एकामेव लतिकां प्रमाणवशेन वेष्टयेदित्येकचूडकः ।। (10.0)

उभयतोमुखच्छिद्रः स्थूलकर्कशपृषतगुटिकायुक्तः प्रमाणयोगी कट्यां बद्धः कञ्चुको जालकं वा ।। (11.0)

तदभावे अलाबूनालकं वेणुश्च तैलकषायैः सुभावितः सूत्रजङ्घाबद्धः श्लक्ष्णा काष्ठमालाल्वा ग्रथिता बहुभिरामलकास्थिभिः संयुक्तेत्यपविद्धयोगाः ।। (12.0)

न त्वपविद्धस्य कस्यचिद्व्यवहृतिरस्तीति दाक्षिणात्यानां लिङ्गस्य कर्णयोरिव व्यधनं बालस्य ।। (13.0)

युवा तु शस्त्रेण छेदयित्वा यावद्रुधिरस्यागमनं तावदुदके तिष्ठेत्।। (14.0)

वैशद्यार्थं च तस्यां रात्रौ निर्बन्धाद्व्यवायः ।। (15.0)

ततः कषायैरेकदिनान्तरितं शोधनम् ।। (16.0)

वेतसकुटजशङ्कुभिः क्रमेण वर्धमानस्य वर्धनैर्बन्धनम् ।। (17.0)

यष्टीमधुकेन मधुयुक्तेन शोधनम् ।। (18.0)

ततः सीसपत्रकर्णिकया वर्धयेत्।। (19.0)

म्रक्षयेद्भल्लातकतैलेनेति व्यधनयोगाः ।। (20.0)

तस्मिन्न् अनेकाकृतिविकल्पान्यपद्रव्याणि योजयेत्।। (21.0)

वृत्तमेकतो वृत्तमुदूखलकं कुसुमकं कण्टकितं

कङ्कास्थिगजप्रहारिकमष्टमण्डलिकं भ्रमरकं शृङ्गाटकमन्यानि वोपायतः

कर्मतश्च बहुकर्मसहता चैषां मृदुकर्कशता यथा सात्म्यमिति नष्टरागप्रत्यानयनम् ।। (22.0)

एवं वृक्षजानां जन्तूनां शूकैरुपलिप्तं लिङ्गं दशरात्रं तैलेन मृदितं पुनः पुनरुपलिप्तं पुनः प्रमृदितमिति जातशोफं खट्वायामधोमुखस्तदन्तरे लम्बयेत्।। (23.0)

ततः शीतैः कषायैः कृतवेदनानिग्रहं सोपक्रमेण निष्पादयेत्।। (24.0)

स यावज्जीवं शूकजो नाम शोफो विटानाम् ।। (25.0)

अश्वगन्धाशबरकन्दजलशूकबृहतीफलमाहिषनवनीतहस्तिकर्णवज्रवल्लीर सैरेकैकेन परिमर्दनं मासिकं वर्धनम् ।। (26.0)

एतैरेव कषायैः पक्वेन तैलेन परिमर्दनं षण्मास्यम् ।। (27.0)

दाडिमत्रपुसबीजानि वालुकं बृहतीफलरसश्चेति मृद्वग्निना पक्वेन तैलेन परिमर्दनं परिषेको वा ।। (28.0)

तांस्तांश्च योगानाप्तेभ्यो बुध्येतेति वर्धनयोगाः ।। (29.0)

स्नुहीकण्टकचूर्णैः पुनर्नवावानरपुरीषलाङ्गलिकामूलमिश्रैर्यामवकिरेत्सा नान्यं कामयेत ।। (30.0)

तथा सोमलतावल्गुजभृङ्गलोहोपजिह्विकाचूर्णैर्व्याधिघातकजम्बूफल-रसनिर्यासेन घनीकृतेन लिप्तसंबाधां गच्छतो रागो नश्यति ।।(31.0)

गोपालिकाबहुपादिकाजिह्विकाचूर्णैर्माहिषतक्रयुक्तैः स्नातायां गच्छतो रागो नश्यति ।। (32.0)

नीपाम्रातकजम्बूकुसुमयुक्तमनुलेपनं दौर्भाग्यकरं स्रजश्च ।। (33.0)

कोकिलाक्षफलप्रलेपो हस्तिन्याः संहतमेकरात्रं करोति ।। (34.0)

पद्मोत्पलकन्दसर्जकसुगन्धचूर्णानि मधुना पिष्टानि लेपो मृग्या विशालीकरणम् ।। (35.0)



www.ayurvedam.in

स्नुहीसोमार्कक्षीरैरवल्गुजाफलैर्भावितान्यामलकानि केशानां श्वेतीकरणम् ।। (36.0)

मदयन्तिकाकुटजकाञ्जनिकागिरिकर्णिकाश्लक्ष्णपर्णीमूलैः स्नानां केशप्रत्यानयनम् ।। (37.0)

एतैरेव सुपक्वेन तैलेनाभ्यङ्गात्कृष्णीकरणं क्रमेणास्य प्रत्यानयनम् ।। (38.0)

श्वेताश्वस्य मुष्कस्वेदैः सप्तकृत्वो भावितेनालक्तकेन रक्तोऽधरः श्वेतो भवति ।। (39.0)

मदयन्तिकादीन्येव प्रत्यानयनम् ।। (40.0)

बहुपादिकाकुष्ठतगरतालीशदेवदारुवज्रकन्दकैरुपलिप्तं वंशं वादयतो या शब्दं शृणोति सा वश्या भवति ।। (41.0)

www.ayurvedah.in

धत्तूरफलयुक्तोऽभ्यवहार उन्मादकरः ।। (42.0)

गुडो जीर्णितश्च प्रत्यानयनम् ।। (43.0)

हरितालमनःशिलाभक्षिणो मयूरस्य पुरीषेण लिप्तहस्तो यद्द्रव्यं स्पृशति तन्न दृश्यते ।। (44.0)

अङ्गारतृणभस्मना तैलेन विमिश्रमुदकं क्षीरवर्णं भवति ।।(45.0)

हरीतक्याम्रातकयोः श्रवणप्रियंगुकाभिश्च पिष्टाभिर्लिप्तानि लोहभाण्डानि ताम्रीभवन्ति ।। (46.0)

श्रवणप्रियंगुकातैलेन दुकूलसर्पनिर्मोकेण वर्त्या दीपं प्रज्वाल्य पार्श्वे दीर्घीकृतानि काष्ठानि सर्पवद्दृश्यन्ते ।। (47.0)

श्वेतायाः श्वेतवत्साया गोः क्षीरस्य पानं यशस्यमायुष्यम् ।। (48.0)

ब्राह्मणानां प्रशस्तानामाशिषः ।। (49.0)



www.ayurvedah.in

पूर्वशास्त्राणि संदृश्य प्रयोगानुपसृत्य च । (50.1)
कामसूत्रमिदं यत्नात्संक्षेपेण निवेशितम् ।। (50.2)

धर्ममर्थं च कामं च प्रत्ययं लोकमेव च । (51.1)
पश्यत्येतस्य तत्त्वज्ञो न च रागात्प्रवर्तते ।। (51.2)

अधिकारवशादुक्ता ये चित्रा रागवर्धनाः । (52.1)
तदनन्तरमत्रैव ते यत्नाद्विनिवारिताः ।। (52.2)

न शास्त्रमस्तीत्येतेन प्रयोगो हि समीक्ष्यते । (53.1)
शास्त्रार्थान्व्यापिनो विद्यात्प्रयोगांस्त्वेकदेशिकान्।। (53.2)

बाभ्रवीयांश्च सूत्रार्थानागमं सुविमृश्य च । (54.1)
वात्स्यायनश्चकारेदं कामसूत्रं यथाविधि ।। (54.2)

तदेतद्ब्रह्मचर्येण परेण च समाधिना । (55.1)
विहितं लोकयात्रायै न रागार्थोऽस्य संविधिः ।। (55.2)

रक्षन्धर्मार्थकामानां स्थितिं स्वां लोकवर्तिनीम् ।     (56.1)

अस्य शास्त्रस्य तत्त्वज्ञो भवत्येव जितेन्द्रियः ।।     (56.2)

तदेतत्कुशलो विद्वान्धर्मार्थाववलोकयन्।     (57.1)

नातिरागात्मकः कामी प्रयुञ्जानः प्रसिध्यति ।।     (57.2)

www.ayurvedalk.in

e-publication of www.ayurveda.in .

Online FREE in pdf format

1. Āyurveda books
    a. Astanga Hridayam
    b. Astanga Samgraha
    c. Charaka Samhita
    d. Madhava nidanam
    e. Sarangadhara Samhita
    f. Sushruta Samhita
2. Contemporary books
    a. Agastiya Ratnapariksa
    b. Amarakosa
    c. Ashtadhyayi
    d. Garbhopanisat
    e. Gheranda Samhita
    f. Goraksa Shataka
    g. Hatyoga pradipika
    h. Kamasutra
3. Other books
    a. **Puranas**
    b. **upanishadas**

www.ayurvedah.in

## Other publications (Hard copy) Published or Marketed by **aarsha**, Jaipur and available on www.ayurveda.in

1. Tatvabodha Commentary (of Sivadas Sen) on Astanga hridaya **Rs 300|-**
2. Bhanumati Commentary (of Chakrapani dutta)on Sushruta Samhita **Rs 150|-**
3. Charakatatvapradipika Commentary (of Sivadas Sen) on Charaka Samhita **Rs 300|-**
4. Charakopaskara commentary (of Sivadas Sen) on Charaka Samhita **Rs 300|-**
5. Chanda in Ayurveda Samhita
   :student edition **Rs 175** ( original price Rs 300)
6. madhavaniadna Avavodha 2
   :student edition **Rs 300** ( original price Rs 495)
7. madhavanidana Anusthana I
   :student edition **Rs 600** ( original price Rs 1095)
8. madhavanidana Anusthana II
   :student edition **Rs 700** ( original price Rs 1195)
9. Madhavanidana patha
   :student edition **Rs 500** ( original price Rs 895)

**aarsha**, jaipur
Plot no. 4, Khandelwal nagar Extn,
Near Premnagar pulia, Agra Road,
Jaipur- 302031, Rajasthan

www.ayurvedah.in